वुधपुत्रे पुरूरवसि स्त्रपे उर्वशीवल्लभादयोऽप्यत्र ।

**उर्वारु** पु० उरु-यथा तथा ऋच्छति ऋ—उण् । कर्कट्याम् । स्वार्थे कन् अत्रैव । "उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्" ऋ० ७,५९, १२, । यजु० ३,६, "उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः" ३,७, अस्य स्त्रीत्वमपि अप्राणिजातिवचनत्वात् ऊङ् । उर्वारूः तदर्थे "छिन्ध्यस्य बन्धनं मूलमुर्वार्वा इव" अथ० ६,१४,१,

**उर्वी** स्त्री उरु+गुणवचनत्वात् स्त्रियां वा ङीप् । १वृहत्त्वयुक्तायां स्त्रियाम् "उर्वीं स्रजम्" उरुशब्दे उदा० २पृथिव्यां च तस्यावृहत्त्वात् तथात्वम् । "तैरुर्वीनिहितचलत्पदं प्रचेले" माघः । "अनन्यशासनामुर्वीं शशासैकपुरीमिव" "स्थितः सर्वोन्नतेनोर्वीम्" रघुः वेदे "सुपांसुलुगित्यादिना" पा० सर्वविभक्तौ डियजादेशः "सिन्धुर्नक्षोद उर्विया व्यश्वैत्" ऋ० १,९२,१२, "उर्विया महती" भा० "प्रतीची चक्षुरुर्विया विभाति" १,९२,९ । ३नद्याम् निरु० ।

**उर्वीधर** पु० उर्वीं धरति धृ—अच् ६त० । पर्वते तेषां कीलकरूपेण अवष्टम्भनेन पृथिव्याधारकत्वात् तथात्वम् भूधरादयोऽप्यत्र "गर्भोऽभवत् भूधरराजपत्न्याः" कुमा०

**उर्वीधव** पु० ६त० । पृथिवीनाथे राजनि । उर्वीशोर्वीश्वर तन्नाथादयोऽप्यत्र

**उर्वीभृत्** पु० उर्वीं बिभर्त्ति धारयति पालयति वा भृ-क्विप् तुक् ६त० । १पर्वते २राजनि च एवं पृथिवीभृद्धरणीभृदादयोऽप्यत्र । "उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विस्मय यत् । अनुमितोऽपि हि बाष्पनिरीक्षणात् व्यभिचचार न तापकरोऽनलः" नैष० तत्र धरणीभृत् राजा पर्वतश्च अत्र व्यभिचारश्च साधनसमानाधिकरणाभावप्रतियोगित्वरूपः तेन साध्ये तत्सम्भवः तादृशव्यभिचारश्च उपाधिवादे चिन्तामणौ अङ्गीकृतः तच्च उपाधिशब्दे दर्शितम्

**उर्वीरुह** पु० उर्व्यां रोहति रुह-क ७त० । वृक्षे "क्षिरसयोर्वीरुहवल्लितन्तुभिः" माघः

**उर्व्या** स्त्री उरोर्भाव वा० यत् उलोपश्च । महत्त्वे "रुद्राणामुर्व्यायां स्वादित्याः" शत० ब्रा० १,५,१,१७, "उर्व्यायां महत्त्वे" भा०

**उल** दाहे (सौत्रः)पर०सक०सेट् । ओलति औलीत्

**उल** पु० उल—दाहे कर्मणि घञर्थे क । मृगभेदे "उलो हलिक्ष्णो वृषदंशस्ते धात्रे" यजु० २४,३१ । "उलो मृगभेदः" वेददी० । ततः चतुरर्थ्यां बला०य । उल्य तत्कर्षनिकृष्टदेशादौ त्रि० ।

**उ(ओ)लड** उत्क्षेपे इदित् वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । उ(ओ)लण्डयति ते उ(ओ)लण्डति औलिलण्डत् त औलण्डीत् अयं लडि ओदित् इत्येके ।

**उलन्द्र(न्द)** पु० राजभेदे तेन निर्वृत्तम् अरीहणादि० वुञ् । औलिन्द(न्द्र)क तन्निर्मितपुरादौ त्रि०

**उलप** पु०न० वल—कपच् संप्रसारणम् । १शाखापत्रप्रचययुतायां लतायाम् २कोमले तृणभेदे न० (उलुखड) । "नवोलपालङ्कृतसैकताभः" "उत्तीर्य्य भारलघुनाप्यलघूलपौघसौहित्यनिःसहतरेण तयोरधस्तात्" माघः ।

**उलप्य** पु० उलपे भवः यत् । रुद्रभेदे । "नमोलोप्याय चोलप्याय" यजु० १६,४५, रुद्राध्यायः

**उलिन्द** पु० वल-बा० किन्दच् संप्र० । देशभेदे उणादिकोषः ।

**उलु** त्रि० वल रस्य लः । १वृहति २वृद्धियुक्तशब्दे च विवाहादौ स्त्रीभिरुच्चार्य्ये शब्दभेदे "प्रकारे गुणवचनस्य" पा० प्रकारे द्वित्वम् । उलूलु उरुप्रकारे । "उच्चैरुलूलुध्वनिरुच्चचार" नैष० "यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन् सर्व्वाणि च भूतानि सर्व्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनुतिष्ठन्ति" छा० उ० । "उलूलवः उरुरवः विस्तीर्णरवाः" शा०भा० ।

**उलुप** पु० उरु पायते रक्ष्यते अस्मात् पा रक्षणे—अपादाने घञर्थे क रस्य लः । उलपत्वे । "तृणोलुपपुलाकचिह्नानुमेयैर्जरत्कान्तारकूपैरिव" काद०

**उलुलि** पु० उल—उलि । हर्षसूचकशब्दे । "पृथग् घोषा उलूलयः केतुमन्त उदीरताम्" अथ० ४,१९,६,

**उलूक** पु० वल—समवाये ऊक संप्रसारणम् । १पेचके, जातित्वात् स्त्रियां ङीष् उलूकीसा च ताम्रायाः कन्यायाः श्येन्याः कन्या "षट् सुतास्तु महासत्त्वास्ताम्रायाः परिकीर्त्तिताः" इत्युपक्रम्य "शुकीशुकानजनयदुलूकी प्रत्युलूककान्" विष्णुपु० । २इन्द्रे, कैतव्ये ३दुर्य्योधनदूतभेदे ४तृणभेदे । (उलखड़) "त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः" माघः "श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्" मनुः "यदुलूको वदति मोघमेतत्" ऋ०१०,१६५,४, "विविधाश्चैव सम्पीडाः काकोलूकैश्च भक्षणम्" मनुः । अत्र काकोलूकैरित्युक्तेः काकोलूकमित्यादि विरोधे समाहारैकत्वविधानं प्रायिकमिति गम्यते । "उलूकान् सुषुवे काकी श्येनी श्येनान् व्यजायत" भा०आ०६३ । उलूकनामा दूतश्च युधिष्ठिरादीनां समीपे दुर्य्योधनेन प्रेषितः यथा "कैतूयोपह्वरे